# श्रीमद् भागवत रसिक कुटुंब

## श्री कृष्ण कृपा कटाक्ष स्तोत्र

भजे व्रजैकमण्डनं(म्) समस्तपापखण्डनं(म्),
स्वभक्तचित्तरं(ञ्)जनं(म्) सदैव नन्दनन्दनम्।
सुपिच्छगुच्छमस्तकं(म्) सुनादवेणुहस्तकम्,
अनं(ङ्)गरं(ङ्)गसागरं(न्) नमामि कृष्णनागरम्॥1॥

मनोजगर्वमोचनं(वँ) विशाललोललोचनं(वँ),
विधूतगोपशोचनं(न्) नमामि पद्मलोचनम्।
करारविन्दभूधरं(म्) स्मितावलोकसुन्दरं(म्),
महेन्द्रमानदारणं(न्) नमामि कृष्णवारणम्॥2॥

कदम्बसूनकुण्डलं(म्) सुचारुगण्डमण्डलं(वँ),
व्रजां(ङ्)गनैकवल्लभं(न्) नमामि कृष्णदुर्लभम्।
यशोदया समोदया सगोपया सनन्दया,
युतं(म्) सुखैकदायकं(न्) नमामि गोपनायकम्॥3॥

सदैव पादपं(ङ्)कजं(म्) मदीय मानसे निजं(न्),
दधानमुक्तमालकं(न्) नमामि नन्दबालकम्।

समस्तदोषशोषणं(म्) समस्तलोकपोषणं(म्),
समस्तगोपमानसं(न्) नमामि नन्दलालसम्॥4॥

भुवो भरावतारकं(म्) भवाब्धिकर्णधारकं(यँ),
यशोमतीकिशोरकं(न्) नमामि चित्तचोरकम्।
दृगन्तकान्तभं(ङ्)गिनं(म्) सदा सदालिसं(ङ्)गिनं(न्),
दिने दिने नवं(न्) नवं(न्) नमामि नन्दसम्भवम्॥5॥

गुणाकरं(म्) सुखाकरं(ङ्) कृपाकरं(ङ्) कृपापरं(म्),
सुरद्विषन्निकन्दनं(न्) नमामि गोपनन्दनम्।
नवीनगोपनागरं(न्) नवीनकेलिलम्पटं(न्),
नमामि मेघसुन्दरं(न्) तडित्प्रभालसत्पटम्॥6॥

समस्तगोपनन्दनं(म्) हृदम्बुजैकमोदनं(न्),
नमामि कुं(ञ्)जमध्यगं(म्) प्रसन्नभानुशोभनम्।
निकामकामदायकं(न्) दृगन्तचारुसायकं(म्),
रसालवेणुगायकं(न्) नमामि कुं(ञ्)जनायकम्॥7॥

विदग्ध गोपिकामनो मनोज्ञतल्पशायिनं(न्),
नमामि कुं(ञ्)जकानने प्रवृद्धवह्निपायिनम्।
किशोरकान्तिरं(ञ्)जितं(न्) दृगं(ञ्)जनं(म्) सुशोभितं(ङ्),
गजेन्द्रमोक्षकारिणं(न्) नमामि श्रीविहारिणम्॥8॥

यदा तदा यथा तथा तथैव कृष्णसत्कथा,

मया सदैव गीयतां(न्) तथा कृपा विधीयताम्।
प्रमाणिकाष्टकद्वयं(ञ्) जपत्यधीत्य यः(फ्) पुमान्,
भवेत्स नन्दनन्दने भवे भवे सुभक्तिमान्॥9॥

इति श्रीमज्जगदगुरु आदिशं(ङ्)कराचार्य भगवतः
कृतो श्रीकृष्णाष्टकम् सम्पूर्णम्।